# वैयाकरणसिद्धान्तकौमुदी

## स्त्रीप्रत्ययप्रकरणम् (१५)

## २५.०२.२०१३

# पुनरावर्तनम्

- ङीष्
  - अन्यतो ङीष्
  - षिद्गौरादिभ्यश्च

# ५००. जानपदकुण्डगोण.... (४.१.४२)

- पदद्वयम् । जानपद-कुण्ड-गोण-स्थल-भाज-नाग-काल-नील-कुश-कामुक-कबराद्, वृत्ति-अमत्र-आवपन-अकृत्रिमा-श्राणा-स्थौल्य-वर्णा-अनाच्छादन-अयोविकार-मैथुनेच्छा-केशवेशेषु ।
- ‘अन्यतो ङीष्’ (४.१.४०) इत्यतः ‘ङीष्’ इति अनुवर्तते ।
- एभ्यः एकादशभ्यः प्रातिपदिकेभ्यः क्रमाद् वृत्त्यादिष्वर्थेषु ङीष् स्यात् ।

- जानपदी (ङीष्) वृत्तिश्चेत्, अन्या तु जानपदी (ङीप्) ।
- जनपदे भवा ।
- उत्सादित्वाद् अञन्तत्वेन ‘टिड्ढाणञ्..’ इति ङीपि आद्युदात्तः ।
- ङीषि तु प्रत्ययस्वरेण अन्तोदात्तत्वम् ।

- कुण्डी अमत्रं चेत्, कुण्डान्या ।
- कुण्डीति ।
- कुण्डा = दहनीया ।
- ‘कुडि दाहे’ । ‘गुरोश्च हलः’ इति अप्रत्ययः ।
- यस्तु ‘अमृते जारजः कुण्डः’ इति मनुष्यजातिवचनः ततो जातिलक्षणो ङीष् भवत्येव ।
- जातिलक्षण इति ।
- अमत्रे हि स्त्रीविषयत्वादप्राप्तो ङीष् विधीयते, न तु नियम्यते ।
- अमत्रे हीति ।

- गोणी आवपनं चेत्, गोणान्या ।
- कस्याश्चिद् इदं नाम ।

- स्थली अकृत्रिमा चेत्, स्थलाऽन्या ।
- इदानींतनपुरुषपरिष्कृता भूमिः कृत्रिमा, तद्भिन्ना अकृत्रिमा ।

- भाजी श्राणा चेत्, भाजान्या ।
- ‘यवागूरुष्णिका श्राणा’ इत्यमरः ।
- भाजा = पक्वा ।

- नागी स्थूला चेत्, नागाऽन्या ।
- गजवाची नागशब्दः स्थौल्यगुणयोगादन्यत्र प्रयुक्तः उदाहरणम् ।
- सर्पवाची तु दैर्घ्यगुणयोगादन्यत्र प्रयुक्तः प्रत्युदाहरणम् ।

- काली वर्णश्चेत्, कालान्या ।
- काली = कालवर्णविशिष्टा, काला = क्रौर्ययुक्ता / कस्याश्चन नाम ।

- नीली अनाच्छादनं चेत्, नीलाऽन्या ।
- नील्या रक्ता शाटीत्यर्थः ।
- 'नील्या अन् वक्तव्यः' (वा) इत्यन् ।
- अनाच्छादनेऽपि न सर्वत्र, किन्तु 'नीलादोषधौ' (वा) ।
- नीली ।
- 'प्राणिनि च' (वा)
- नीली गौः ।
- 'संज्ञायां वा' (वा)
- नीली, नीला ।

- कुशी अयोविकारश्चेत्, कुशाऽन्या ।
- कामुकी मैथुनेच्छा चेत्, कामुकाऽन्या ।
- कबरी केशानां सन्निवेशश्चेत्, कबराऽन्या - चित्रा इत्यर्थः ।

| | |
|---|---|
| जानपदी = वृत्तिः | जानपदी (ङीप्) = जनपदे भवा |
| कुण्डी = अमत्रम् (पात्रम्) | कुण्डा = दहनीया |
| गोणी = आवपनम् | गोणा = संज्ञा |
| स्थली = अकृत्रिमा भूमिः | स्थला = कृत्रिमा भूमिः |
| भाजी = श्राणा | भाजा = पक्का |
| नागी = हस्तिनी | नागा = सर्पिणी |
| काली = कालवर्णयुक्ता | काला = क्रूरा |
| नीली = ओषधिः, प्राणिः वा | नीला = नीलवर्णयुक्तं पदार्थान्तरम् (उदा - नीलवर्णयुक्ता शाटिका) |
| कुशी = अयस्तृणम् | कुशा = तृणम् |
| कामुकी = मैथुनेच्छावती | कामुका = धनादीच्छावती |
| कबरी = केशवेशः | कबरा = चित्रा |

# ५०१. शोणात्प्राचाम् (४.१.४३)

- पदद्वयम् । शोणात्, प्राचाम् ।
- 'अन्यतो ङीष्' (४.१.४०) इत्यतः 'ङीष्' इति अनुवर्तते ।
- शोणशब्दात् विकल्पेन ङीष् स्यात् ।
- शोणात्प्राचामिति ।
- शोणी, शोणा ।

# ५०२. वोतो गुणवचनात् (४.१.४४)

- पदत्रयम् । वा, उतः, गुणवचनात् ।
- 'अन्यतो ङीष्' (४.१.४०) इत्यतः 'ङीष्' इति अनुवर्तते ।
- उदन्ताद् गुणवाचिनः वा ङीष् स्यात् ।
- वा ङीबिति ।
- बालमनोरमाकृतात्र ङीप् इति पाठो मन्यते । अन्यत्र तु सर्वत्र कौमुदीपुस्तकेषु ङीष् इत्येव पाठः । न च व्याख्यानादिषु क्वापि ङीपोऽनुवृत्तिरत्रोक्ता ।

- गुणवचनम् -
- सत्त्वे निविशतेऽपैति पृथग्जातिषु दृश्यते ।
- आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः ॥ (महाभाष्यम्)

- मृद्वीति ।

- मृद्वी, मृदुः ।

- उतः किम् - शुचिः ।
- गुण इति किम् - आखुः ।

# खरुसंयोगोपधान्न (वा)

- खरुशब्दात् संयोगोपधाच्च ‘वोतो गुणवचनात्’ इति ङीष् नेत्यर्थः ।
- खरुः पतिंवरा कन्या ।
- पतिंवरा कन्येति ।

- पाण्डुः ।